ॐ नमः प्रतीचे विघ्नहर्त्रे ।

अथ

उपदेशपञ्चकं रत्नप्रभाटीकायुतं प्रारभ्यते ।

ॐ यस्मिन्विश्वं भाति खे नीलतावत् श्रोतव्यो यस्तत्त्वमस्यादिवाक्यैः ।
ज्ञाता ज्ञानाद्यस्य पूर्णत्वमेति शुद्धं बुद्धं शङ्करोऽस्मीति नौमि ॥ १ ॥
पूर्णात्मानं बालकाग्रातिसूक्ष्म-मभ्यर्णस्थं ह्यण्डतो दूरगं च ।
बोध्यं बोधाद्बोध्यबोधप्रहीना-त्सर्वातीतः सर्वगोऽस्मीति नौमि ॥ २ ॥
नाहं वक्ष्ये कल्पवृक्षोऽस्ति लोके, युक्तो वक्तुं नास्ति चिन्तामणिश्च ।
संसाराऽब्धिर्गोष्पदं यत्कटाक्षा-त्पूर्णात्मानं दैशिकेन्द्रं नमामि ॥ ३ ॥

इह खलु परमानन्दस्वभावः परमकारुणिको भगवान् उमापतिः श्रीशंकरो मोहार्णवे प्रोह्यमानानां जनानामुत्तारणाय स्वमायया भगवत्पूज्यपादशंकररूपेणाविष्कृतानुत्तममूर्तिः, मिथ्याज्ञानात्मकप्रमादभ्रंशितविवेकबुद्धिभिर्नानाद्वैतवादपङ्केन तिरस्कृतामत्यद्भुतवेदतरणीं यथार्थव्याख्यानेन स्वरचितभाष्यामृतसारेण परिधौतपङ्कां निधायान्तर्धानसमये तत्तात्पर्यभूतब्रह्मात्मैक्यभावं यथाज्ञानावतारेण वेदपारंगतेनादिगुरुणा भगवता वसिष्ठेनोत्तमाधिकारिणं श्रीरामं प्रति जागराद्यवान्तरसंज्ञाभेदोक्त—शुभेच्छाख्यादिभूमिकाजयक्रमेण निरूपितम् ।

---

१ सर्वासामनुभूतीनामादर्शो यो ह्यकृत्रिमः । अगम्यो मललेखानां तच्चित्तत्वमह महत् । २ वाक्यार्थो वर्ण्यते यत्र पदैर्वाक्यानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥

Scanned by CamScanner

"ज्ञानभूमिः शुभेच्छाद्या, द्वितीया स्याद्विचारणा। तनुमानसिका सत्त्वापत्ति-रासक्तिनामिका ॥ १ ॥ पदार्थाभावनी षष्ठी, सप्तमी तुर्यगा स्मृता। आसामन्ते स्थिता मुक्तिर्यस्यां भूयो न शोचति" इति ॥ २ ॥

तद्वत् सङ्ग्रहेण बुबोधयिषुरधिकारित्वमारभ्य विदेहकैवल्यपर्यन्तं श्रवणादिप्रयत्नसहितं सकलवेदान्तार्थसारं श्लोकपञ्चकेनोपदिष्टवान्।

अस्यापि वेदान्तप्रकरणत्वात्तदीयैरेव विषयसम्बंधप्रयोजनैः श्रोतृणां प्रवृत्त्यङ्गतया प्रतिपादितैर्विषयादिमत्तोपपत्तेः न ते पृथगुपन्यस्ताः।

यत्तु गुरुदेवतानमस्करणात्मकं मङ्गलाचरणं सुखप्रबोधप्रचयगमनाभ्यां सदाचारप्रदर्शनाय च प्रकरणेषु संप्रदायविद्भिराद्यश्लोकेन ग्रथितं तदपि कृपानिधिना भगवता श्रीमच्छङ्करेणास्मिन्प्रकरणारम्भे सर्वात्मकब्रह्मानुसन्धानेन मनसा कृतमेवं ज्ञातव्यम् ॥ न तदभावशङ्कावसरः तस्य मङ्गलरूपत्वात्। "शङ्करः शङ्करः साक्षात्" इति पुराणवचनादिति। यद्वाद्यश्लोकान्तर्वर्तीशोद्देशेन मुखतोऽपि प्रतिपादितम्।

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामुपचितिः काम्ये मतिस्त्यज्यताम्। पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयतामात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं
विनिर्गम्यताम् ॥ १ ॥

---

१ शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्। प्राहुः प्रकरणं नाम ग्रन्थभेदं विचक्षणाः ॥ २ जीवब्रह्मैक्यम् ॥ ३ वेदान्तपरब्रह्मणोः प्रतिपादकप्रतिपाद्यलक्षणः ॥ ४ अज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च। 'तरति शोकमात्मवित्, ब्रह्मविद्ब्रह्मैव भवति' इत्यादिश्रुतेः।

Scanned by CamScanner

तत्रानादिभवपरम्परानुभूतानेकविषयवासनावासितान्तःकरणानां सहसा विषयवासनापरावर्तनेन प्रत्यगात्मतत्त्वब्रह्मप्रवणतामापाद्य परब्रह्मात्मतत्त्वं बोधयितुमशक्नुवन्प्रथमतो वेदाध्ययननित्यादिकर्माण्येव परमपुरुषार्थसाधनतयोपदिशति—वेदो नित्यमिति ।

वेदः काण्डत्रयात्मको नित्यं मुखमात्रेणाखिलतदर्थज्ञानपर्यन्तं सर्वदा कालविलम्बं विनैव ब्रह्मचर्यगुरुकुलनिवासाद्यध्ययनविधिवत् अधीयताम् । तदुदितं तेन विहितं कर्म सु सम्यक् श्रद्धादिपुरःसरमनुष्ठीयताम् । कर्मशब्देन नित्यनैमित्तिकप्रायश्चित्तोपासनानि संगृहीतानि । यद्यपि अन्यत्र नित्यादिकर्म चित्तशुद्धिहेतुत्वाच्चित्तैकाग्र्यकारणभूतोपासनात्पृथक् प्रतिपादितम् । इह तु कर्मोपासनासमुच्चयस्य "विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते"॥ "यो वास्या अप्यास्तनवस्ता अभिध्येयादर्चयेन्निह्नुयाच्च" इत्यादिश्रुतिषु निरूपितत्वादुपासनापि कर्मशब्देन प्रतिपादिता ज्ञातव्या । तेनेशस्येति । तेन वेदोक्तप्रकारेण कर्मणा ईशस्येशनशीलस्य योपचितिः पूजा सा विधीयतां फलाभिलाषं विनैव क्रियतां तस्मिन्सर्वकर्मफलदातरि समर्प्यतामित्यर्थः । काम्ये इहामुत्रभोगसाधने यातायातकारणे कर्मणि मतिरनुकूलबुद्धिस्त्यज्यतां संकल्पमात्रेणाऽपि काम्यकर्मकरणं मा सह्यतामित्यर्थः । पापौघः पापानां समूहो नित्याद्यनुष्ठानैकपरतया परिधूयतां त्यज्यताम् । एतेन निषिद्धकर्मवर्जनमपि सिद्धमिति वेदितव्यम् ।

---

१ चित्तशुद्धिं विना । २ सजातीयप्रत्ययप्रवाहाभिमुखम् । ३ साक्षात्कारयितुम् । ४ यथा भवति तथा ५ उपासनाम् । ६ कर्म । ७ एकेन पुरुषेणाऽनुष्ठेयम् । ८ अग्निहोत्रादिकर्मणा । ९ मृत्युं स्वाभाविकं कर्मज्ञानं च मृत्युशब्दवाच्यमुभयम् ।१० उपासनया । ११ देवतात्मभावम् ।१२या: काश्चिद्वास्या वासयोग्या आश्रयार्हा ब्रह्मणोऽप्या: श्रेष्ठा ब्रह्मविष्ण्वादिरूपास्तनवस्ताऽर्चयेत पुष्पोपहारादिना पूजयेत्, प्रतिमासु हृदये वा निह्नुयात् तत्तदुपास्यदेवतात्माभिमानेन पृथक् देवतात्वं परित्यजेत् ।

एवं काम्यनिषिद्धवर्जनपुरःसरं नित्यादिकर्मानुष्ठानप्रभावादीश्वरार्पितचित्तानां शुद्धान्तःकरणानामुपासनया च चित्तैकाग्र्यसहितानां जिज्ञासावतां साधनचतुष्टयमुपदिदिक्षुः तावदिहामुत्रफलभोगविरागमाह–भवेति । भवः संसारस्तज्जे सुखे इह स्रक्चन्दनादिभोगरूपेऽमुत्रामृतादिभोगरूपे च साधनसाध्यत्वाद्दोषोऽनित्यतालक्षणोऽनुसन्धीयतां "यत्कृतकं तदनित्यम्" इति न्यायात् । "तद्यथा कर्मचितो लोकः क्षीयते । एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादिश्रुतेश्च ॥ इहामुत्रार्थफलभोगविरागं प्रतिपाद्य इदानीं नित्यानित्यवस्तुविवेकं मुमुक्षुत्वं चैकीकृत्याह–आत्मेच्छेति । अनित्यदेहादिविलक्षणो नित्यो यः परमात्मा तस्येच्छाहं ममेदमित्यादि परमनिगडात्मकभवभावनाराहित्येन पूर्णात्मभावेन कदा कथमवतिष्ठामीत्येवंरूपा व्यवसीयतां निश्चीयतामित्यर्थः ।

एवंभूतो विरक्तः किं कुर्यादित्यत आह–निजगृहादिति । निजात्स्वीयत्वेनाभिमताद् गृहाद्विशेषेण रागादिकषायपरिहारेण निर्गम्यताम् । "पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षुचर्यां चरन्ति" इत्यादिश्रुतेः ।

यथा मम स्वगृहाद्विनिर्गत्यान्यत्र मङ्गललाभो भविष्यति तथा कालविद्भिः सह विचार्याश्विन्यादिनक्षत्रेषु कश्चनोत्तमः कालः प्रवासायोचित इत्येतादृग्विलम्बबुद्धिपरिहारायाह–तूर्णमिति–तूर्णमाशु । विरक्तस्य गृहान्निर्गमने वैराग्यप्राप्तिकाल एवोत्तमः कालः "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति श्रुतेः ॥ १ ॥

---

१ कर्मभिश्चीयते सम्पाद्यते इति । २ लोक्यतेऽनुभूयते इति लोको भोगः ।

संगः सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयतां शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम् । सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुके सेव्यताम् । ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समुत्कर्ण्यताम् ॥ २ ॥

विहितानुष्ठानेन निषिद्धपरिवर्जनेन च शुद्धान्तःकरणानां वैराग्यादिकमुपवर्ण्य इदानीमवशिष्टानि साधनान्तराणि गुरूपसदनं च वर्णयिष्यन् आदौ सतां सङ्गमुपदिशति--**संग इति** । सत्सु साधनसम्पत्सम्पन्नेषु मुमुक्षुषु सङ्गो विधीयतां वैराग्यादिदार्ढ्याय क्रियतां, न तु स्त्रीहिरण्यादिषु, तेषां संगमेन संसारमध्यपातित्वमेव । उक्तं च " योषिद्धिरण्याभरणाम्बरेषु, द्रव्येषु मायारचितेषु मूढः । प्रलोभितात्मा ह्युपभोगबुद्ध्या,पतंगवन्नश्यति नष्टदृष्टिः" इति ॥ १ ॥ अथवा सत्सु तत्त्वनिष्ठेषु तेषां सङ्गमेन साधनानां यथार्थतया सिद्धिर्भवति ।

नच तत्त्वनिष्ठानां सङ्गस्तत्त्वज्ञानार्थमेव, न तु तत्त्वज्ञानसाधनसिद्ध्यर्थमिति वाच्यम् । यथा उत्तररामायणे मोक्षोपायेषु वैराग्यप्रकरणस्य चतुर्थे सर्गे "कथाभिः सुविचित्राभिः स वसिष्ठादिभिः सह । स्थित्वा दिनचतुर्भागं ज्ञानगर्भाभिरादृतः ॥ १ ॥ कृतायां तीर्थयात्रायां रामो निजगृहस्थितः । जगामानुदिनं कार्श्यं शरदीवामलं सरः "॥ २ ॥

इत्यादिवाक्यैरधिकारिमूर्धन्यः श्रीरामश्चित्तशुद्धिहेतुभूतभौमयज्ञात्मकतीर्थयात्रानन्तरं पूर्वं श्रीवसिष्ठादिसङ्गमेन वैराग्यादिसाधनानि समासादितवानिति अवगम्यते । पुनः स एव । " अयं हि दग्धसंसारो नीरन्ध्रकलनाकुलः । कथं

१ 'एते भौमा मया यज्ञा तीर्थरूपेण निर्मिताः' इति ॥

सुस्वादतामेति नीरसो मूर्खतां विना ॥ १ ॥ रागद्वेषमहारोगभोगपूर्वा विभूतयः । कथं जन्तोर्न बाधन्ते संसारारण्यचारिणः ॥ २ ॥ यथा जानामि भगवंस्तथा मोहनिवृत्तये । ब्रूहि मे साधवो यूयं येन निर्दुःखतां गताः ॥ ३ ॥

इत्यादिश्लोकैर्वैराग्यप्रकरणस्यान्तिमग्रन्थेन तत्त्वज्ञानार्थं तस्मै शरणं गतवानिति च ज्ञायते । तद्वदत्राऽपि ब्रह्मसाक्षात्कारवतां ब्रह्मविद्याप्रदातॄणां संगमो विवेकवैराग्यादिसाधनसिद्ध्यर्थं बोद्धव्यम् । तथैव प्रकरणान्तरे भूमिकानिरूपणावसरे भगवद्वसिष्ठोक्तिः श्रीरामं प्रति—"प्रथमं जातमात्रेणैव पुंसा किंचिद्विकसितबुद्धिनैव सत्संगमपरेण भवितव्यम् । अनवरतप्रवाहापतितोऽयमविद्यानदीनिवहः सज्जनसम्पर्कादृते तरितुं न शक्यते । तेन विवेकवतः पुरुषस्य हेयोपादेयविचार उत्पद्यते । तेनासौ शुभेच्छाभिधां विवेकभुवमापतितो भवति" इति । यद्यपि केषांचित् भाग्यवशतः स्वतोऽपि च साधनानि भवन्ति । तथापि स्वप्रेप्स्यदृढीकारायावश्यं सतां संगमः कर्तव्य इति अभिप्रायः ॥ भगवतः स्वतःसिद्धज्ञानैश्वर्यादिशक्तियुक्तस्य सर्वनियन्तुः श्रीविष्णोर्भक्तिः सर्वोत्कर्षतयाराध्यत्वेन परमप्रीतिर्दृढाच्छिन्ना धीयतां धार्यतामित्यर्थः । सन्मार्गे प्रवृत्तस्य विघ्नानां बाहुल्याद्भगवद्भक्तिरपि तत्त्वज्ञानसाधनं "ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः" इत्यादिश्रुतेः ॥ तथैव भगवता त्र्यक्षेण ब्रह्मणा सह नारदादिभिर्भगवत्स्तुतिद्वारा—"तथा न ते माधव तावकाः क्वचिद्भ्रश्यन्ति मार्गात्त्वयि बद्धसौहृदाः । त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्धसु प्रभो" ॥ १ ॥ इति प्रतिपादितत्वाच्चेति । "अन्योऽसावहमन्योऽस्मीत्युपास्ते योऽन्यदेवताम् । न स वेद नरो ब्रह्म स

१ अज्ञानतीव्रतिमिरान्धस्येतिशेषः । २ इह जन्मनि जन्मान्तरे वानुष्ठितैर्निष्कामकर्मभिः शुद्धचित्तेनेत्यर्थः ॥ ३ सतां संगेन । ४ विचारेण । ५ । विश्वासः । ६ ब्रह्मभवनकामी । ७ 'देवकीपुत्र' इति शब्देन रूपातिरेकात्वं सूचितं भवति । ८ सन्मार्गात् ।

देवानां यथा पशुः ॥ उज्झित्वाऽऽत्मसमाधानं ये ध्यायन्त्यन्यदेवताम् । भिक्षन्ते भूरिवित्तास्ते भिक्षित्वापि बुभुक्षिताः" इत्यादिवाक्यैर्भगवद्भक्तिरुपेक्षणीयेति न शङ्कनीयम तत्र तत्र मिथ्यादेहाद्यभिनिविष्टानां वहिर्मुखानां लोकाद्येषणावतां क्षुद्रानन्दलुब्धानां भूमानन्दाविर्भावसाधनभूतब्रह्मात्मजिज्ञासोत्पादनाय तथा तथा धिक्करणतिरस्करणाद्युक्तयः । न त्वधिकारिणां भगवद्वैमुख्यार्थमित्यभिप्रायः ॥

साङ्गं साधनत्रयमभिधाय, इदानीं चतुर्थं साधनं निरूपयति—शान्त्यादिरिति । 'इहामुत्रफलभोगविरागनित्यानित्यवस्तुविवेकमुमुक्षुतावतां प्रबलकामादिवृत्त्यभावेऽपि, मनसः स्वभावचाञ्चल्यादहेतुकत्वेनापि श्रवणादिकं विहाय विषयेषूड्डीयमानस्य, सर्वथा तेभ्यस्तयैव वैराग्यविवेकयुक्त्या समाकृष्य या श्रवणादिपरता सा शान्तिः । आदिशब्दो दमादिकपञ्चकामानित्वादिसाधनान्तरबोधनार्थः ॥ दमादयस्तु दमोपरतितितिक्षासमाधानश्रद्धाख्याः । दमो नाम बाह्यकरणवर्गस्य श्रवणादिवैमुख्येन विषयेषु प्रवर्तमानस्य सहसा तेभ्यः समासादितप्राग्वर्णितयुक्त्या सर्वसाधनसम्पादने सहायभूतया निग्रहः । तेषां निगृहीतानां करणानां श्रवणाद्यनौन्मुख्येन सर्वथा विषयेषु यथा प्रवृत्तिर्न स्यात्तथोपरमणमुपरतिः । शीतोष्णादिदुःखानां सहिष्णुता तितिक्षा । निगृहीतस्य चित्तस्य नित्यानित्यवस्तुविवेकलक्ष्ये ब्रह्मणि मनसो मुहुर्मुहुश्चिन्तनं । समाधानम् ।

अखण्डार्थप्रतिपादकेषु सद्गुरुवेदान्तादिवाक्येषु या भक्तिः सा श्रद्धा । अमानित्वादीनि तु "अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।

---

१ विद्यमानैरविद्यमानैर्वा गुणैरात्मनः श्लाघनं मानित्वम् । २ लाभपूजाख्यात्यर्थं स्वधर्मप्रकटीकरणं दम्भित्वम् । ३ कायवाङ्मनोभिः प्राणिनां पीडनं हिंसा । ४ परापराधे चित्तविकारहेतौ प्राप्तेऽपि निर्विकारचित्ततया तदपराधसहनं क्षान्तिः । ५ अकौटिल्यं यथाहृदयं व्यवहरणं परप्रतारणारहितमितियावत् आर्जवम् ।

Scanned by CamScanner

आचार्योपासनं शौचं[२] स्थैर्यमात्मविनिग्रहः" इत्यादिवाक्यैः श्रीभगवद्गीतासु प्रसिद्धानि । तेषां शान्त्यादीनां परिचयः क्रियतामित्यर्थः ।

शान्त्यादिवत्सन्यासोऽप्यात्मज्ञानान्तरङ्गसाधनत्वादवश्यं मुमुक्षुभिरनुष्ठेयः, इत्यभिप्रेत्याह—**दृढतरमिति** । कर्मशब्देन विहितानि नित्यादीनि प्रतिपादितानि भवन्ति । न तु काम्यनिषिद्धलौकिकानि । तेषां प्रागेव वर्जितत्वात् । आशु तत्क्षणमेव दृढतरं यथा भवति तथा वेदोक्तप्रकारेण प्राजापत्यामेवेष्टिं कृत्वा सन्त्यज्यतां, तदसन्त्यागे संसारानिवृत्तिः स्यात् । "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" । "नास्त्यकृतः कृतेन" । "न्यास एवात्यरेचयति" इत्यादिश्रुतिभ्यः ॥ तथा च वार्तिककारैः "त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् । श्रुत्या विधीयते यस्मादन्यथा पतितो भवेत्" । इति । एतेन ज्ञानकर्मसमुच्चयो निराकृतः । न च कर्मसम्भवेऽपि कर्मफलकामनात्यागात्तत्फलभ्रंशवचनमेव कल्प्यते इति वाच्यम् । निष्कामानामपि कर्मणां फलसद्भावस्य श्रुतिस्मृतिषु प्रतिपादितत्वात् । "कर्मणा पितृलोकः" इत्यादि श्रुतेः । तथा च आपस्तम्बः स्मरति । "तद्यथाम्रे फलार्थे[८] निर्मिते छायागन्धे इत्यनूत्पद्येते । एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते । नो[९] चेदनूत्पद्यन्ते न धर्महानिर्भवतीति ॥ फलसद्भावेऽपि तदभिसन्ध्यनभिसन्धिभ्यां काम्यनित्ययोर्विशेषतः । अनभिसंहितस्यापि[११] वस्तुस्वभावादुत्पत्तौ न विशेषः ॥ "स हि सर्वैर्विजिज्ञास्य आत्मा वर्णैस्तथाश्रमैः । प्राप्ता ज्ञान-

---

१ सद्गुरुसेवा । २ मृज्जलादिना बाह्यम् । मनोमलानां रागादीनां विषयदोषदर्शनादिरूपप्रतिपक्षभावनयापनयनमभ्यन्तरमिति द्विविधम् । ३ मोक्षसाधने प्रवृत्तस्यानेकविघ्नप्राप्तावपि तत्परित्यागेन पुनः पुनः प्रयत्नाधिक्यम् । ४ आत्मनो देहेन्द्रियसंघातस्य स्वभावप्राप्तां मोक्षप्रतिकूले प्रवृत्तिं निरुद्ध्य मोक्षसाधन एव व्यवस्थापनम् । ५ मोक्षः । ६ कर्मणा । ७ सति ८ फलार्थे । ९ फलार्थं नो कृतं चेत् । १० फलकामना । ११ फलस्य ।

दशामेतां पशुम्लेच्छादयोऽपि ये ॥ १ ॥ सदेहा वा विदेहा वा ते मुक्ता नाऽत्र संशयः ” इत्यादिवाक्यैः संन्यासनैरपेक्ष्येण ब्रह्मविद्याप्राप्तिश्रवणात् । तथा जनकादीनां स्वराज्ये स्थितानां साक्षात्कारलाभस्य श्रुतिस्मृतिवृद्धोषितत्वाच्च न संन्यासस्य मुख्यत्वमिति न भ्रमितव्यम् । तेषां योगभ्रष्टानां प्राक्संन्यासप्रभावात्तथात्वम् ।

अन्यथा क्रियापराणां गृहिणां स्वचित्ताद्रावज्ञानान्ध्यनिवर्तकविवेकभानूदय एव न स्यात् । कुतो ब्रह्मात्मज्ञानलाभ इति भावः ॥ “ भवसुखे दोषोऽनुसन्धीयतामित्यादि, दृढतरं कर्माशु सन्त्यज्यताम्” इत्यन्तेन वैराग्यादिसाधनसम्पन्नस्यास्मिन्प्रकरणेऽधिकारित्वं सिद्धं भवति॥ तथा च भगवता वसिष्ठेनापि नित्यानित्यवस्तुविवेकादिपुरःसरं फलपर्यवसायिमोक्षेच्छापरनामकशुभेच्छाख्यप्रथमभूमिकानिरूपणेनादावधिकारित्वमुत्तरोत्तरभूमिकालाभाय दर्शितम् ।

इदानीं साधनसम्पन्नानां सत्यात्मलाभाय गुरूपसदनमाह—सद्विद्वानिति। सद्विद्वानध्यात्मशास्त्रजन्यविवेकद्वारा साक्षात्कृतसत्यात्मकब्रह्मात्मभावः । उप समीपे सर्प्यतां गम्यतामित्यर्थः ॥ अत्रेदमाकूतम् ॥ एवंविधसाक्षात्कारयुक्तस्यापरोक्षात्मदृष्टिप्रदातृत्वे संशयच्छेदकत्वे चायत्नत एव प्रागल्भ्यात्[2] ब्रह्मात्मजिज्ञासावतां मुमुक्षूणां तस्मै उपसर्पणमुचितम् ।

न तु साक्षात्काररहितानां शास्त्रार्थपरिचययुक्तानां केवलश्रोत्रियाणाम् । तथा सर्वथा शास्त्रार्थपरिशीलनाभावेनेश्वरानुग्रहात्केवलयोगादिनोत्पन्नसाक्षात्कारवतां च सङ्गमः फलाय कल्प्यते ॥ “ तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्” इत्यादिश्रुतेः ॥ “यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ १ ॥ गुरौ

---

१ अभिप्रायः । २ प्रागल्भ्यमिति पाठः साधुर्भासते ।

यथैते वर्तन्ते तथा विद्यापि तेष्विह " इत्यादिश्रुतिस्मृत्युक्तन्यायेन गुरुभक्तेरपि ब्रह्मज्ञानान्तरङ्गसाधनत्वं निरूपयति-**प्रतिदिनमिति** । प्रतिदिनमहरहर्नैरन्तर्येण तत्पादुके सेव्यताम् । पादुकाग्रहणमादरार्थम् । उक्तं च । "महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगम् । महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये " ततः किं कुर्यादित्यत आह । **ब्रह्मैकाक्षरमिति** । ब्रह्मैकाक्षरं परिपूर्णाद्वितीयाविनाशिस्वरूपमर्थ्यतां याच्यतामित्यर्थः । मुमुक्षूणामपरोक्षतया ब्रह्मावगतिस्तु महावाक्यश्रवणेनैव भवेदिति वर्णयितुमाह—**श्रुतिशिर इति** । श्रुतिशिरोवाक्यं जीवब्रह्मैक्यप्रतिपादनपरं तत्त्वमस्यादिमहावाक्यचतुष्टयं समुत्कर्ण्यतां जाड्यविक्षेपादिदोषपरिहारपूर्वकाखण्डानन्दात्मकाद्वितीयब्रह्मावाप्त्यौत्सुक्येन श्रूयतामित्यर्थः । उक्तं च । "रजस्तमोभ्यां रहितां शुद्धसत्वानुपातिनीम् । मतिमात्मनि संस्थाप्य ज्ञानं श्रोतुं स्थिरो भव" इति ।

यद्यपि "सर्वं खल्विदं ब्रह्म" । " ईशावास्यमिदं सर्वं यत्किं च जगत्यां जगत् " । इत्यादीनि ऐक्यात्मप्रतिपादनपराणि सन्ति बहूनि वाक्यानि । तथापि तेषां मध्ये प्रसिद्धं वेदचतुष्टयस्य शिरोभूषणभूतं महावाक्यचतुष्टयम । ' प्रज्ञानं ब्रह्म '' इति ऋक्शाखान्तर्गतम् । " अहं ब्रह्मास्मि " इति यजुःशाखान्तर्गतम । " अयमात्मा ब्रह्म" इति अथर्वशाखान्तर्गतम । " तत्त्वमसि" इति सामवेदान्तर्गतमिति । चतुर्णामेतेषां महावाक्यानां मध्ये " तत्त्वमसि"इति वाक्यस्य वाक्यार्थं निरूपयामः । स एवाऽन्येषां वाक्यानां सरणिः ।स

---

१ स्वस्थीकृत्य । २ ईशिता परमेश्वरः परमात्मा सर्वस्य । स हि सर्वमं (?) सर्वजन्तूनामात्मा सन् तेन स्वेनात्मना ईशावास्यं सर्वात्मक ईश्वरोस्मीति ज्ञानेनाऽऽच्छादनीयम् । तत्किं जगत्यां पृथिव्यां यद्दिदं सर्वं किंच जगत् भ्रान्त्यानीश्वररूपेण गृहीतमनृतं नामरूपकर्मांख्यं विकारजातं कर्तृत्वभोक्तृत्वादिलक्षणं च ।

च पदार्थमन्तरेण न सम्भवति। वाक्यं तु पदसमुदायात्मकम्। अत्र पदानि "तत्, त्वम्, असि" इति त्रीणि। तेषां पदानां मध्ये तत्त्वंपदयोरर्थौ वाच्यलक्ष्यरूपेण द्विविधः। तथाहि। कार्यात्मकस्थूलादिसमष्टिमान्। तत्फलितं सर्वज्ञत्वादिविशिष्टं चैतन्यम्। एतदाऽऽधारभूतं निर्विशेषं चैतन्यं च। एतत्त्रयं तप्ताऽयःपिण्डवदेकत्वेनावभासमानं सत्तत्पदवाच्यार्थो भवति। उपाधितत्प्रतिफलितयोराधारभूतं निर्विशेषं चैतन्यं तत्पदलक्ष्यार्थो भवति। कार्यात्मकस्थूलादिशरीरव्यष्टिमानविद्योपाधिस्तत्प्रतिफलितमल्पज्ञत्वादिविशिष्टं चैतन्यमेतदाधारभूतं साक्षिरूपं कूटस्थचैतन्यं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं सत् त्वंपदवाच्यार्थो भवति। उपाधितत्प्रतिफलितयोराधारभूतं प्रत्यगानन्दं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति। भवसीत्यर्थे "असीति" क्रियापदं तु तत्त्वंपदयोः सामानाधिकरण्यवतोरर्थद्वयैकत्वबोधनार्थः। यथा- "नीलोत्पलमानय" इति वाक्ये। नीलोत्पलपदद्वयार्थयोर्गुणगुणिनोर्विशेषणविशेष्यभावसंसर्गस्य नीलगुणतद्विशिष्टोत्पलयोरैक्यस्य च वाक्यार्थत्वाङ्गीकारे तद्वाक्यार्थः संगच्छते। तथास्मिन्वाक्ये तत्त्वंपदार्थयोः परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्ययोः परस्परविरुद्धयोः संसर्गाद्यनभ्युपगमेनैक्यतानुपपत्त्या वाक्यार्थो न संगच्छते। तस्माद्वाक्यार्थसिद्धये "मानान्तरविरोधे तु मुख्यार्थस्यापरिग्रहे। मुख्यार्थेनाविनाभूते प्रवृत्तिर्लक्षणेष्यते" इति न्यायाल्लक्षणापेक्षा। सा च जहत्, अजहत्, जहदजहद्भेदेन त्रिविधा। तत्र "गङ्गायां घोषः प्रतिवसति" इत्यत्र वाक्ये गङ्गापदार्थस्य प्रवाहस्य घोषाधारताऽनुपपत्त्या सर्वथा गङ्गापदार्थत्यागेन

---

१ जडानृतदुःखाहंकारादिभ्यः प्रतिकूलत्वेन सत्यज्ञानानन्दरूपत्वेनाञ्चति प्रकाशते इति प्रत्यक्। २ भिन्नप्रवृत्तिनिमित्तयोरेकस्मिन्विषये तात्पर्ये सम्बन्धः सामानाधिकरण्यम्। ३ यत्सम्बन्धबलाद्वस्तु वस्तुतो भिद्यते परात्। भेदकापरपर्यायं तद्विशेषणमुच्यते। ४ सति।

तीरलक्षणया जहल्लक्षणा यथा संगच्छते तथा प्रकृते तत्त्वमस्यादिवाक्ये परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्ययोस्तत्त्वंपदार्थयोः परोक्षत्वापरोक्षत्वांशे विरोधाच्चैतन्यैकत्वे विरोधाभावात्सर्वथा तत्पदस्य त्वंपदस्य वा स्वार्थपरित्यागासम्भवान्न संगच्छते। "शोणो धावति" इति वाक्यवदजहल्लक्षणापि न संगच्छते। तत्र शोणगुणस्य धावनासम्भवात्तत्परित्यागमन्तरेण तदाश्रयभूतगवादिलक्षणया जहल्लक्षणा सम्भवति। अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्ययोः परस्परविरुद्धयोः शोणगुणवत्परित्यागाभावे विरोधपरिहारासम्भवाच्चेतनान्तराभावेन गवाद्यात्मकाश्रयवदाश्रयाभावाच्चाजहल्लक्षणा न संगच्छते। तस्माद्यथा—"सोऽयं देवदत्तः" इति वाक्यं तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यर्थस्यांशे विरोधाद्भागलक्षणापरनाम्न्या जहदजहल्लक्षणया विरुद्धांशपरित्यागेनाविरुद्धदेवदत्तपिण्डमात्रं लक्षयति तथा "तत्त्वमसि" इति वाक्यं परोक्षत्वापरोक्षत्वांशविशिष्टचैतन्यैकत्वलक्षणस्य वाच्यार्थस्यांशे विरोधाल्लक्षणया विरुद्धांशपरित्यागेनाखण्डचैतन्यमात्रं लक्षयतीति। उक्तं च—"तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा। सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा ॥१॥ संसर्गो वा विशिष्टो वा वाक्यार्थो नाऽत्र संमतः। अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥२॥ प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः। अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः ॥३॥ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्। अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि॥४॥ तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु। पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ५ ॥" इति। यतो हेयस्वरूपानवगमे तद्धानासम्भवाद् ग्राह्यलाभासिद्धिस्ततोऽध्यारोपापवादन्यायोऽप्यज्ञानादिप्रपञ्चस्य स्वरूपदर्शनमार्जनाभ्यां सर्वाधाराखण्डपरमानन्दात्मकप्रत्यगभिन्नब्रह्मावगमको महावाक्यश्रवणस्याङ्गभूतः प्रदर्श्यते। अध्यारोपस्तावत्।

१ विवर्त। २ अभिष्ठान।

द्रवतादिशून्ये आतपे नद्यारोपवन्निष्प्रपञ्चे चिदानन्दरूपे ब्रह्मणि अज्ञानादिप्रपञ्चारोपोऽध्यारोपः। अज्ञानं तु—सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञाननिवर्त्यं चिदानन्दरूपब्रह्मप्रतिबिम्बयुक्तमावरणविक्षेपात्मकशक्तिद्वयसहितं भावरूपम्। "मामहं न जानामि" इत्यनुभवात्। "देवा॒त्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादिश्रुतेश्च ॥ तच्च समष्टिव्यष्ट्यभिप्रायेण सत्त्वशुद्ध्यविशुद्धिभ्यां विक्षेपप्रधाना माया, आवरणप्रधाना विद्या चेति द्विविधं भवति। "जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतेः ॥ विशुद्धसत्त्वप्रधानमायाफलितं चैतन्यं गुणान्तरैरकलुषीकृतत्वात् स्वाधीनमायाशक्तिसर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वजगत्कारणत्वादिधर्मभेदैर्वेदान्तेषूद्घोष्यमाणः स्वतन्त्र ईश्वरः। "यः सर्वज्ञः सर्ववित्" इत्यादिश्रुतेः। तस्य सा शक्तिरखिलकारणत्वात्कारणशरीरम्। कार्यप्रपंचाभावेनानन्दातिशयवत्त्वादानन्दमयः कोशः। चराचरात्मकप्रपञ्चस्य लयस्थानत्वात्सुषुप्तिः ॥ ॥ मलिनसत्त्वप्रधानाविद्याप्रतिफलितं चैतन्यं गुणान्तरैः कलुषीकृतत्वादविद्याशक्त्यधीनं स्वोपाधिमालिन्यतारतम्यात् सुरनरतिर्यगादिभेदेन विचित्ररूपं किञ्चिज्ज्ञत्वकिंचित्कर्तृत्वादिधर्मभेदैर्व्यवह्रियमाणोऽस्वतन्त्रः प्राज्ञः ॥ अस्यापि सा शक्तिः। स्थूलसूक्ष्मशरीरादिकारणत्वात्कारणशरीरम्। अन्तर्बहिष्करणचाञ्चल्याभावोद्भूतानन्दस्य कोशत्वात्कोशवदावरकत्वाच्चानन्दमयः कोशः ॥ अग्रेऽपि वक्ष्यमाणकोशचतुष्टयस्य प्राज्ञविषयस्यावरकत्वं ज्ञातव्यम्। "न भाति नास्ति कूटस्थ इत्यपादनमावृत्तिः" इत्यादिनावृत्तेर्जीवविषयस्योक्तत्वात्। शरीरद्वयलयस्थानत्वात्सुषुप्तिः ॥ एवंविधस्य सर्वज्ञत्वादिगुणयुक्तस्येश्वरस्येक्षापूर्वकसर्जनेच्छया निमित्तभूतया प्राज्ञानां सुखदुःखभोगाय सामासतमःप्रधानादज्ञानादुपादानकारणभूतादाकाशनाकाश-

---

१ देवस्यात्मनः। २ अत्र शक्तिशब्देन निस्तत्त्वमवगम्यते। उक्तं हि—निस्तत्त्वा कार्यगम्यास्य शक्तिर्मायाग्निशक्तिवत् इति ॥ ३ सामान्यतः। ४ विशेषतः। ५ प्रक ऐंगाज्ञ

द्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते । तेषां सूक्ष्मभूतानामपञ्चीकृतानां तन्मात्राणां पञ्चभिः सत्वांशैरुपादानभूतैः क्रमेण श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि शब्दस्पर्शरूपरसगन्धाख्यपञ्चविषयग्राहकाण्यसाधारणकार्यरूपाण्युत्पन्नानि भवन्ति । पुनस्तेभ्य आकाशादिगतसात्विकांशेभ्यो मिलितेभ्यः साधारणकार्यरूपे द्वे बुद्धिमनसी उत्पद्येते।अनयोरहंकारचित्तयोरन्तर्भावः ॥एतेषां बहिरन्तःकरणानां सात्विकांशकार्यत्वं तु प्रकाशात्मकत्वात् । एवमेवैतेषां पञ्चभी रजोंशैः क्रमेण वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि वचनादानगमनविसर्गानन्दाख्यपञ्चविधक्रियासाधनान्यसाधारणकार्याण्युत्पन्नानि भवन्ति । पुनस्तेभ्य आकाशादिगतरजोंऽशेभ्यो मिलितेभ्यः साधारणकार्यरूपाः प्राणापानव्यानोदानसमानाख्याः पञ्च वायव उत्पद्यन्ते ॥ एतेषां रजोंऽशकार्यत्वं च क्रियात्मकत्वात् । एवं सप्तदशावयवकानि लिङ्गशरीरापरनामकानि सूक्ष्मशरीराणि भवन्ति । उक्तं च । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" । इति । तेषु तेजोमयान्तःकरणोपाधिलक्षितेषु लिङ्गशरीरेष्वनेकबुद्धिविषयतया व्यक्तिवद्व्यष्टिशब्देन कथ्यमानेषु पृथक् पृथक्तादात्म्याभिमानेन प्राज्ञास्तैजससंज्ञका भवन्ति ॥ ईश्वरस्तु तेषु सर्वेषु लिङ्गशरीरेष्वेकबुद्धिविषयतया जातिवत्समष्टिशब्देन कथ्यमानेष्वेकत्वेन तादात्म्याभिमानाद्धिरण्यगर्भसंज्ञको भवति। अस्य हिरण्यगर्भत्वं ज्ञानेच्छाशक्तिद्वयवत्त्वात्, तथा सूत्रात्मा, प्राण,इति च, सर्वत्रानुस्यूतत्वात्, क्रियाशक्तिमत्त्वाच्च भवति ॥ अनयोः प्राज्ञेश्वरयोरेते व्यष्टिसमष्टी स्थूलशरीरस्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरम्

---

१ विषिण्वन्ति विषयिणमऽवबध्नन्ति स्वेन रूपेण निरूपणीयं कुर्वन्तीति विषयाः । २ हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥ इति प्राणादीनां स्थानानि । प्रागागमनार्वागागमनविष्वगागमनोर्ध्वगमनान्नादिसमीकरणस्वरूपाः क्रमेण वृत्तयस्तेषाम् । ३ पुसो लयं गच्छतीति लिङ्गम् । जीवचिह्नत्वाच्च लिङ्गस्य लिङ्गत्वम् ।

जाग्रद्वासनामयत्वात्स्वप्नः । विज्ञानमयादिकोशत्रयमिति चोच्यते ॥ कोशत्रयाणि तु निश्चयात्मिका बुद्धिर्ज्ञानेन्द्रियपञ्चकसहिता सती, विज्ञानमयः कोशः स्यात् । सङ्कल्पात्मकं मनस्तैरेव सहितं सत्, मनोमयः कोशः स्यात् । क्रियात्मकाः पञ्च वायवः कर्मेन्द्रियसहिताः सन्तः, प्राणमयः कोश स्यात् । एतेषां ज्ञानेच्छाक्रियाशक्तिमतां क्रमेण कर्तृकरणकार्यरूपत्वं केचिद्वर्णयन्ति ॥ स एवेश्वरो हिरण्यगर्भभावापन्नस्तेषां तैजसानां भोगायावशिष्टमाकाशादिकमेकैकं द्विधा विभज्य तेषां मध्ये प्राथमिकानर्धभागांश्चतुर्धा विभज्येतरभूतानामविभक्तचतुर्भागार्धैः सहाविभक्तस्वभागार्धमन्तरेण योजनात्पञ्चीकरणं करोति ॥ उक्तं च । "द्विधा विधाय[1] चैकैकं चतुर्धा प्रथमं[2] पुनः[3] । स्वस्वेतरे[4]द्वितीयांशैर्योजनात्पञ्च पञ्च ते" इति । तदनन्तरमस्य सर्वकर्तृत्वादिशक्तिमत ईश्वरस्येच्छयैतेभ्यः पञ्चीकृतपञ्चमहाभूतेभ्य उपादानकरणभूतेभ्यो ब्रह्माण्डपिण्डावुत्पद्येते । तत्रोपर्युपरि वर्तमाना भूम्यादयः सप्त लोकाः । भूमेरधःस्थितान्यतलादीनि सप्त भुवनानि तेषु द्विसप्तभुवनेषु प्राणिभिर्भोक्तुं योग्यान्यन्नपानादीनि तत्तल्लोकोचितानि चतुर्विधस्थूलशरीराणि प्रादुर्भवन्ति ॥ चतुर्विधशरीराणि तु । जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि ॥ तेषु चतुर्विधस्थूलशरीरेष्वनेकबुद्धिविषयतया व्यक्तिवद्व्यष्टिशब्देन कथ्यमानेषु पृथक् पृथक्तादात्म्याभिमानेन सुरनरतिर्यगादिभेदभिन्नास्तैजसा विश्वसंज्ञका भवन्ति ॥ हिरण्यगर्भस्तु तेषु सर्वेषु स्थूलशरीरेष्वेकबुद्धिविषयतया जातिवत्समष्टिशब्देन कथ्यमानेष्वेकत्वेन तादात्म्याभिमानाद्वैश्वानरसंज्ञको भवति ॥ अस्य वैश्वानरत्वं सर्वनराभिमानित्वात्तथा विराजमपि वदन्ति, विविधंराजमानत्वादिति। अनयोर्विश्ववैश्वानरयोरेते व्यष्टिसमष्टी स्थूलत्वात् स्थूलशरीरम् अन्नविकारत्वादन्नमयः कोशः, कर्णादिगोलस्थैः श्रोत्रा

१ विधाय । २ अर्धभागम् । ३ विभागानन्तरम् । ४ इतरभूतानाम । ५ अविस

दिभिरर्थोपलब्धिहेतुत्वाज्जाग्रदवस्था चेत्युच्यते ॥ एवंविधासु तिसृष्ववस्थास्वीश्वरप्राज्ञौ सुषुप्तौ, स्वोपाधिवृत्तिभिः सूक्ष्मतमाभिरानन्दमनुभवतः। तावेव स्वप्ने हिरण्यगर्भतैजससंज्ञकावन्तःकरणवृत्तिभिः सूक्ष्मविषयाननुभवतः। जागरे तु वैश्वानरविश्वाख्यौ दिग्वातार्कवरुणाश्व्याख्यैर्ज्ञानेन्द्रियाधिष्ठातृदेवैरग्नीन्द्रोपेन्द्रयमप्रजापत्याख्यैः कर्मेन्द्रियाधिष्ठातृदेवैश्चन्द्रचतुर्मुखशङ्कराच्युताख्यैर्मनोबुद्ध्यहङ्कारचित्ताख्यान्तःकरणाधिष्ठातृदेवैश्च क्रमान्नियन्त्रितेन श्रोत्रादिज्ञानेन्द्रियपञ्चकेन वागादिकर्मेन्द्रियपञ्चकेन, मनआद्यन्तःकरणचतुष्केन च शब्दस्पर्शरूपरसगन्धान् वचनादानगमनविसर्गानन्दान्, सङ्कल्पनिश्चयाहङ्कारचैत्त्यांश्च सर्वान् स्थूलविषयाननुभवतः॥ एवं चिदानन्दरूपे ब्रह्मणि मिथ्या प्रपञ्चारोपोऽध्यारोपः॥

अपवादस्तु तापविवर्तरूपाया नद्यास्तापमात्रत्ववत् ब्रह्मविवर्तस्याज्ञानादिप्रपञ्चस्य ब्रह्ममात्रत्वम्॥ तथाहि सर्वेषां नराणां स्वप्नाख्ये स्वेऽवस्थाविशेषे खगनगनगरनरपश्वादिसहितं भूमण्डलं सोमसूर्यादियुक्तमुडुमण्डलं च स्थूलत्वेन प्रतीयमानमपि वस्तुतः सूक्ष्मात्मकमेव। तथा पञ्चीकृतपञ्चभूतात्मकं चतुर्दशभुवनचतुर्विधस्थूलशरीरादियुक्तं ब्रह्माण्डं स्थूलत्वेनावभासमानं विवेकदृष्ट्या दृष्टं सत् सूक्ष्मात्मकमेव। सूक्ष्मं तु अज्ञानविजृम्भणमात्रम्। अज्ञानस्य चिदानन्दघने ब्रह्मण्यत्यन्ताभावात्सर्वं ब्रह्ममात्रमेव॥उक्तं च "स्थूलं विचारतः सूक्ष्मं तदविद्या विचारतः। सापि चिन्मात्रमेवातः सर्वं ब्रह्मेति भण्यते" इति॥ एवमध्यारोपापवादन्यायेन तत्त्वंपदार्थशोधनपूर्वकं श्रुतिसारभूतमहावाक्यश्रवणमेवापरोक्षतयाखण्डब्रह्मावाप्तये मुख्यं श्रवणमिति। "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति"। "यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि

---

१ मध्ये। २ अतात्त्विकाऽन्यथाभावो विवर्तः। ३ म्रियमाणानि। ४ विलक्षणः॥

भूतानि न विदुः । यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः" इत्यादिवाक्यानि सृष्टिस्थितिसंहारनियमनपराण्यनेकानि प्रसिद्धानि । किमखण्डार्थप्रतिपादकमहावाक्यश्रवणेनेति न भ्रमितव्यम् । "सदेव सौम्येदमग्र आसीद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । नेह नानाऽस्ति किंचन" इत्यादिवाक्यैः सृष्ट्यादीनां सत्यात्मकत्वाबोधनादभावप्रतिपादनाच्च ॥ तेषु तेषु वाक्येषु तत्र तत्र महावाक्यार्थे तात्पर्यो न तु सृष्ट्यादिपरत्वे । न च "स एष इह प्रविष्ट आनखाग्रेभ्यः" इत्यादिप्रवेशवाक्यानामभेदप्रतिपादनमन्तरेण प्रवेशपरत्वं वाच्यम्, किन्त्वविकृतस्य ब्रह्मणः प्रवेशश्रवणात्सद्रूपं ब्रह्मैवात्मेत्यवगम्यते । अत्र निरवयवस्य सर्वगतस्यात्मनो बुद्ध्यावभिव्यक्तिमात्रमेव प्रवेशो न तु देवदत्तादेर्गृहादिप्रवेशवत् इति । उक्तं हि "जनितं वियदग्रणि येन जगत्परमात्मसदक्षरनामभृता । प्रविवेश स एव जगत्स्वकृतं खमिवेह घटं घटसृष्टिमनु" इति । तस्मात्सर्वासां श्रुतीनामखण्डार्थपर्यवसायिनीनां सारभूतो महावाक्यार्थः सर्वथा जिज्ञासावतां महता पौरुषयत्नेन श्रोतव्य इत्यभिप्रायः ॥ २ ॥

वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयतां दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम् । ब्रह्मैवास्मि विभाव्यतामहरहर्गर्वः परित्यज्यतां देहेऽहंमतिरुज्झ्यतां बुधजनैर्वादः समुत्सृज्यताम् ॥३॥

"आत्मानं विन्दते यस्तु सर्वभूतगुहाशयम् । श्लोकेन यदि वार्धेन क्षीणं तस्य प्रयोजनम् । वाक्यश्रवणमात्रेण पिशाचकवदाप्नुयात्" इत्यादिवाक्यै-

---

१ ब्रह्मात्मक । २ स्वमायया निर्मितम् । ३ लीनम् ।

महावाक्यश्रवणमात्रेणैव मुमुक्षूणां कार्तार्थ्यमवगम्यते किमनेन वक्ष्यमाणश्लोकेन मनननिदिध्यासनपरेणेति चेत् तत्र तत्र तीव्रतरविरक्तान्प्रति तथा तथोक्तयः। इह तु श्रीमत्पूज्यपादभाष्यकारेणान्येषां साधनचतुष्टयवतां ब्रह्मात्मसाक्षात्काराय श्रवणानन्तरं मनननिदिध्यासनपरत्वम् "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः,, इत्यादिश्रुत्यवष्टम्भेन प्रकरणान्तरं यथा प्रतिपादितं श्रवणमनननिदिध्यासनमन्तरेण न सम्भवतीति, तद्वत् वैर्णयिष्यतादौ श्रुतस्याखण्डार्थस्य स्वाशयारोहाय युक्तियुक्तं मननं प्रतिजानीते--

वाक्यार्थश्चेति। वाक्यार्थोऽखण्डचैतन्यरूपः प्राङ्निरूपितो युक्तिभिर्विचार्यतामित्यर्थः। श्रुतिशिरो महावाक्यचतुष्टयं तस्य पक्षो विवेकाभ्यासात्त्वंपदार्थशोधनपुरस्कारेणाद्वितीयपरमानन्दब्रह्मात्मभावे उद्यमः सम्यग्योगसांख्यादिवादिपक्षान्तरपरिहारेणासमन्ताच्छ्रीयतां सेव्यतामित्यर्थः। अखण्डब्रह्मात्ममात्रस्यानुपयुक्तः कुतार्किकादिकृततर्कवदनात्ममात्रावादको यस्तर्कः स दुस्तर्कस्तस्मात्सुविरम्यतामतिशयेन विनिवर्त्यतामित्यर्थः। श्रुतिमतस्तर्को युक्तियुक्तत्वादनुसन्धीयताम्। श्रुत्युक्तयुक्तयस्त्वन्तर्बहिर्भावेन द्विविधाः। सर्वेषां मुमुक्षूणां यदा वागादिकर्मेन्द्रियपञ्चकं वचनादिक्रियाव्यापारं प्रति प्रवर्तते, श्रोत्रादिज्ञानेन्द्रियपञ्चकं च श्रवणादिस्वव्यापारानुकूलशब्दस्पर्शरूपरसगन्धाख्यपञ्चात्मकविषयजातं परिगृह्णाति तथान्तःकरणमपि संकल्पाध्यवसायस्मरणाभिमानलक्षणं स्वव्यापारसमूहमनुसन्दधाति तदा तस्य तस्य करणस्य तेन तेन विषयेण सह तत्साक्षिरूपे स्वात्मन्यध्यस्तत्वावलोकनात्मिका भावनान्तरी एका युक्तिः। यतो देशकालवस्तुभेदेन वैचित्र्यरूपेण च प्रतीयमानं जडत्वादिगुणकं जगज्जातमखण्डसच्चिन्मात्रस्वरूपेण ब्रह्मणा सत्त्वं स्फुरणत्वं चापन्नं ततो हेतोस्तत्सर्वं ब्रह्मविवर्त एवेति

१ कृतार्थता। २ भाष्यकारेण।

पौनःपुन्येन चिन्ता बाह्यविषया द्वितीया युक्तिः। एतेन "सद्विद्वानुपसर्प्यताम्" इत्यादि, "श्रुतिमतस्तर्कोऽनुसन्धीयताम्" इत्यन्तेनासम्भावनापरिहाराय श्रवणमनने निर्णीते। ते एव भगवता वसिष्ठेनाऽपि गुरुमुपसृत्य वेदान्तवाक्यविचारणात्मकद्वितीयभूमिकाशब्देन कथिते इति॥

नह्यसम्भावनानिवृत्तिमात्रेणापि शुभेच्छावतामधिकारिणां सर्वानर्थनिवर्तकब्रह्मात्मभावं प्रत्याशा। यतो देहाद्यात्मत्वजगत्सत्यत्वबुद्धिलक्षणा विपरीतभावनानेकजन्मकोटिभिर्दृढमूलात्यन्ता सती अपि बालवेतालिका बालानिव पुनःपुनराकर्षयतीत्याशङ्क्य तन्निरासाय श्रवणादिप्रयत्नलब्धविजातीयदेहादिप्रत्ययरहितसजातीयाद्वयवस्तुप्रत्ययात्मकं निदिध्यासनं विवृणोति। ब्रह्मैवेति। ब्रह्मैवास्म्यहमिति शेषः। बृहत्वाद्देशतः कालतो वस्तुतश्चापरिच्छिन्नत्वाद्देशादिविवर्ताधारभूतं यद्ब्रह्म तदेव देहादिसंघातविलक्षणस्तदाश्रयभूतः साक्ष्यात्माहमस्मीत्यर्थः विशेषेणादरातिशयेन भाव्यताम्। भावना हि भाव्यस्य विषयान्तरपरिहारेण चेतसि पुनः पुनर्निवेशनमिति। ईदृग्विधभावनाया अवधिस्तु ज्ञातृज्ञानादित्रिपुटीलयमन्तरेण चित्तस्य ब्रह्माकारेणावस्थितिः। सैव वेदान्तेषु सविकल्पसमाधिशब्देनापि प्रोच्यमाना भवति॥ एतावता ग्रन्थेन वैराग्यं साधनचतुष्टयसम्पत् श्रवणमनने निदिध्यासनं च तत्त्वज्ञानस्य साधनं सिद्धम्। भगवता वसिष्ठेनापि मनसः सूक्ष्मवस्तुग्रहणयोग्यतालक्षणतनुमानसाख्यतृतीयभूमिकाकथनेन निदिध्यासनात्मिका ब्रह्मात्मभावनैव कथिता॥ तदनन्तरं भूमिकात्रयस्य साधनरूपतां च प्रदर्श्य तस्यैव मुमुक्षूणामैक्यात्मभावनायुक्तानां ब्रह्मसाक्षात्काराभावेन मूलोच्छेदपूर्वकमेदबुद्धित्यागासम्भवाजा-

---

१ स्नातं तेन समस्ततीर्थसलिले, दत्ता च सर्वावनिर्यज्ञानां च कृतं सहस्रमखिला, देवाश्च सम्पूजिताः। संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ, यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात्॥ १॥

प्र दवस्थात्वं चोक्तम् । "भूमिकात्रितयं त्वेतद्राम जाग्रदिति स्थितम् । यथा- वद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते" इति । अस्य निदिध्यासनस्यावान्तरसाधना- न्युपदेष्टुकामो यस्य निरसनेन सर्वानर्थनिरसनसिद्धिः सिद्धयति तस्य परिवर्ज- नमादावुपदिशति । अहरहरिति । अहरहः कालनियमं विनैवात्मानानुसन्धाना- त्ममोहमयो मिथ्याप्रत्ययरूपः कामादिबीजभूतोऽहंकाराख्यो गर्वस्तथैव प्रागव- र्णितभावनया परित्यज्यताम् । तेनाहंकारत्यागेन देहे स्थूलेऽहंमतिः स्थूलोऽहं, कृशोऽहं, मनुष्योऽहमित्यादिलक्षणा बुद्धिरुज्झ्यतामित्यर्थः ॥

ननु मुमुक्षूणां यतमानानां सर्वसंशयनिवृत्त्यर्थं विद्वद्भिः सह विविधशास्त्र- संवाद एव प्रशस्ततमत्वात्सदा कर्तव्यः किं निदिध्यासनाग्रहेणेत्याशङ्क्य तेषां श्रवणमननात्मकनिशितकुठारेण निःशेषसंशयतरुमूलोच्छेदस्य प्रागेव सिद्धत्वान्न संवादापेक्षेत्याह—बुधजनैर्वाद इति । " शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः । परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृ- जेत् ॥ १ ॥ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायेद्बहूञ्छ- ब्दान्वाचो विग्लापनं हि तत् " इत्यादिवचनैरैक्यात्मभावनायुक्तानां संवादा- भावस्य दर्शनात् ॥ ३ ॥

क्षुद्व्याधिर्विचिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां स्वाद्वन्नं न तु याच्यतां विधिवशा-

---

१ ब्राह्मणो ब्रह्म भवितुमिच्छुर्मुमुक्षुस्तमेव प्रत्यग्रूपं परमात्मानमेव विज्ञाय संश- याद्यभावो यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्वज्ञानरूपमैकाग्र्यं कुर्वीत सम्पा- दयेत, बहूञ्छब्दान्नानुध्यायेत नानुस्मरेत् । ध्यानेनाभिधानमप्युपलक्ष्यते नाभिदध्याच्च । अन्यशब्दाभिधानेन वाग्विग्लापनानुपपत्तेः । कुत इत्यत आह । वाचो विग्लापनं हि तदिति । हि यस्मात्तदभिधानमनेन स्मरणमप्युपलक्षणं विग्लापयतीति विग्लापनं श्रमहेतुः अयमभिप्रायः । शब्दानुसन्धानेन मनसः श्रमो भवति तदभिधानेन वाच इति ॥

२ यज्यतामित्यपि पाठः ।

त्प्राप्तेन सन्तुष्यताम् । शीतोष्णादि विसह्यतां न तु वृथा वाक्यं समुच्चार्यतामौदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् ॥ ४ ॥

ननु अस्तु चित्ताकाशे विवेकभानूदयेनैवाहंकारकामाद्यात्मकघनतमतमोनिवृत्तिः, ऐक्यात्मभावनाबाधिकानामतिक्षोभकारिणां क्षुधादीनां निरसनं नानुमीयत इत्याशङ्क्य तेषां वर्जनोपायमैक्यात्मभावनादार्ढ्यहेतुभूतावशिष्टसाधनान्तराणि च प्रकटयंस्तावत् क्षुद्व्याधिप्रतीकारमाह-क्षुद्व्याधिर्विचिकित्स्यतामिति स्पष्टार्थः।तर्हि येनोपायेन स व्याधिर्विचिकित्सनीयस्तत्राह—प्रतिदिनमिति। क्षुद्व्याधिविचिकित्सार्थं भिक्षैव महौषधी न ततोऽन्यत्किंचिद्विवेकादि, भिक्षाहृतान्नादिवन्निवर्तक इति भावः । विवेकयुक्तस्य सन्न्यासव्रतः पुरुषस्य भिक्षाहरणकालेऽहं भिक्षुरेते धार्मिका एते पापिनः इदं मिष्टान्नमिदं कदन्नमित्यादिद्वैतभावनयैवैक्यात्मभावनाभावो भविष्यति इति न मन्तव्यम् । " एकमेवाद्वितीयं ब्रह्म, नेह नानाऽस्ति किञ्चन " इत्यादि श्रुत्युक्तन्यायेन युगपदद्वितीयाधिष्ठानपरिचयद्वैतमिथ्यात्वभावनाभ्यां पौरुषातिशयेन समासादिताभ्यामहंममेदमित्यादिभेदबुद्धितिरस्कारेण नास्त्यैक्यात्मभावनाभङ्गावसर इति । भिक्षाहरणकाले नियमविधिं दर्शयति । स्वाद्वन्नमिति । तर्हि पर्युषितौदनमन्यत्किञ्चिद्वा कदन्नं ग्राह्यमित्याशङ्क्याह । विधिवशादिति । विधिवशात्प्राप्तेन भिक्षाहरणकाले यदृच्छयागतेन मिष्टान्नेन कदन्नेन वा सन्तुष्यतां पित्तादिधातुवैषम्यजनितज्वरादिव्याधिवत्प्राणादिसंचारप्रदीप्तजाठराग्निनोद्भूतक्षुद्व्याधिशमनार्थमेव केवलमन्नाद्यदनं नत्वाविद्यकप्राणादिसंघातविलक्षणद्रष्टृरूपस्य मम किंचिल्लाभो हानिर्वेत्यनेन विवेकेनादनसमये सम्यक् स्वात्मनि तुष्यतां न हृष्यतां न वा कुप्यतामित्यर्थः ॥

पूर्वं वैराग्यादिसाधनेषु शान्त्यादिकथनाक्षिप्ततितिक्षापदेन शीतोष्णादिद्वन्द्वसहिष्णुता कथिताऽपि निदिध्यासनयुक्तस्याभेदभावनादार्ढ्यहेतुत्वात् पुनः सिंहावलोकन्यायेन तामादिशति। शीतोष्णादीति। आदिशब्दो देहोद्भवज्वरादिरोगसन्तापप्रोत्थनार्थः। प्रकाशरूपस्य निरवयवस्य वेदकस्य देहिनो जडत्वविकारित्वविचत्वधर्मयुक्तेन शरीरेण सह सम्बन्धाभावाच्छीतोष्णादिग्रहणासिद्धिः। नह्यन्यस्यान्यधर्माश्लेषः। तथा च भाष्यम्। "यत्र हि यदध्यस्तं तत्कृतेन गुणेन दोषेण वाणुमात्रेणापि स न सम्बद्ध्यते" इत्येवंभावनया विशेषेण सह्यतामित्यर्थः॥ हेमन्ते धारागारेषु हिमातिशयसहितेषु स्थलेषु च कन्थादिपरित्यागेन तथा ग्रीष्मे प्रचण्डमार्तण्डातपप्रतप्तवालुकादियुक्तमरुभूम्यादौ शीतोष्णादिसहिष्णुतार्थं महता यत्नेन निवासो, भावनादृढीकारायात्यन्तमुचितमिति ये विभावयन्ति तेऽतिमूढाः। न प्राणत्यागादन्यत्किंचित्तेषां फलं फलति। इह तु यतीनां गमनागमने कस्मिंश्चिन्निवासस्थाने वा यदृच्छयागतशीतोष्णादिसहने तात्पर्यं न चान्यथेति भावः॥

वाङ्नियमं च वर्णयति। न तु वृथा वाक्यमिति। स्वव्यापारानुपयुक्तं वाक्यं वृथावाक्यं तन्न समुच्चार्यताम्। तु शब्दोऽवधारणे। कूटस्थस्य निरीहस्य स्वात्मनो हेयोपादेयद्वन्द्वधर्मानुपरोधाद्द्वन्द्वधर्मस्य च मिथ्यात्वात्स्वभावसिद्धमौदासीन्यं तदभीप्स्यताम्। यदि तु कस्यचिच्छ्रवणमनननिदिध्यासनपरस्यापि मलिनवासनाप्राबल्यात् शुद्धवासनाप्रादुर्भावो न सम्भवति तदा तस्य मैत्र्यादिचतुष्टयम्। साधुषु मैत्री, कर्मिषु मुदिता, दुःखिषु करुणा, पापिषूपेक्षा, इत्येवंलक्षणात्मकम् तदाविर्भावायोपादेयत्वेन ग्राह्यमित्यभिप्रायेणाह—जनकृपेति। दुःखितेषु जनेषु कृपया करुणया नैष्ठुर्यं "युक्तमेतदेतेषां पापिनां दुःखित्वमिति तिरस्कारात्मकं" चित्तकाठिन्यमुत्सृज्यताम्।

करुणाशब्दव्युपदेशेन मैत्र्यादित्रयमपि सूचितं भवति । तस्यैव तदुपलक्षणत्वादित्यभिप्रायः ॥ ४ ॥

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां पूर्णात्माशु समीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् । प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरे श्लिष्यतां प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥ ५ ॥

एवं विधानुत्तमसाधनकलापेन समासादितप्रत्ययान्तरानन्तरितनिदिध्यासनात्मकब्रह्मात्मभावनायुक्तानामनुपमप्रकाशानन्दाविर्भावलक्षणः प्रत्यगभिन्नब्रह्मसाक्षात्कारस्तत्फलभूतसदेहादेहमोक्षश्च निर्विकल्पकसमाध्यभ्यासेन सम्पादनीय इति वर्णयंस्तावत्तदर्थं स्थाननियममुपदिशति ॥ एकान्ते इति । एकान्ते निर्विकल्पकसमाधिप्रतिबन्धकदुर्जनादिवर्जिते स्थाने सुखं यथा भवति तथाऽऽस्यतां स्थीयताम् । न तु योगशास्त्रोक्तासननिर्बन्धेन विक्षिप्यतामित्यर्थः ॥ परतरे इति । "इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः" ॥ "॥ इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः" इत्यादिश्रुतिस्मृतिनिर्णीते सर्वोत्तीर्णस्वरूपे परमात्मनि चेतः समाधीयतां निर्विकल्पकसमाध्यभ्यासेन निरुध्यताम् । निर्विकल्पसमाधिस्तु विवेकभावनादिवशाद्दानन्दातिशयेन ज्ञातृज्ञानादित्रिपुटीलयपूर्वकं चित्तस्य निरतिशयानन्दरूपे

---

१ करुणाशब्दव्यपदेशस्य । २ मैत्र्यादित्रयम् । ३ तत्त्वविदः । ४ अवधारितज्ञाने

ब्रह्मण्यवस्थानम् । तथा च भगवद्वाक्यं सदृष्टान्तमर्जुनं प्रति । " यदा विनियतं चित्तमात्मन्येवावतिष्ठते । निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा[1] ॥ १ ॥ यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता[3] । योगिनो यत[4]चित्तस्य युञ्जतो योगमात्मनः ॥ २ ॥" इति । ननु भगवता पतञ्जलिमुनिना "प्रमाण[5]-विपर्यय[6]विकल्प[7]निद्रा[8]स्मृत्या[9]त्मकनिरोधलक्षणो निर्विकल्पकः समाधिर्योग-शब्देन प्रतिपादितः ॥ "योगश्चित्तवृत्तिनिरोधः" इति ॥ स त्वष्टाङ्गः ॥ अस्याङ्गानि तु " यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः "॥ अत्र " अहिंसासत्या-स्तेय[10]-ब्रह्मचर्यापरिग्रहा[11]: यमाः " ॥ " शौचसन्तो-पतपःस्वाध्यायेश्वरप्र[12]णिधानानि " नियमाः ॥ " करचरणादिसंस्थानविशेष-लक्षणानि पद्मकादीनि" आसनानि । " पूरककुम्भकरेचकलक्षणः प्राणनि-ग्रहोपायः" प्राणायामः ॥ "इन्द्रियदशकस्य स्वस्वमाद्विषयसंघात्प्रत्याहरणं" प्रत्या-हारः ॥ " देशबन्धश्चित्तस्य धारणा" ॥ "तत्र प्रत्ययैकतानता ध्यानम्" ॥ "ज्ञातृज्ञानादित्रिपुटीनिरसनमन्तरेण तस्मिन्नेव प्रदेशे चित्तस्यावस्थानं सविकल्प-

---

१ समाहितः । २ दृष्टान्तः ।७ तज्ज्ञैः । ३ यतचित्तस्य योगिनो योगं युञ्जतोऽनुतिष्ठतो य आत्मान्तःकरणं तस्य निश्चलतया सत्त्वोद्रेकेण प्रकाशतया च निश्चलो दीपो दृष्टान्तः । ५ प्रत्यक्षानुमानशास्त्रोपमानार्थापत्त्यभावाख्यानि षड्विधानि प्रमाणानि । ६ मिथ्याज्ञानं विपर्ययः । तस्य पञ्च भेदाः । अविद्यास्मितारागद्वेषाभिनिवेशाः । ७ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः । प्रमाभ्रमविलक्षणोऽसदर्थव्यवहारः । शशविषाणमसत्पुरुषस्य चैतन्यमित्यादि । ८ अभावप्रत्ययालम्बनावृत्तिरेव निद्रा । चतसृणां वृत्तीनामभावस्य प्रत्ययः करणं तमोगुणस्तदालम्बना वृत्तिरेव निद्रा । न तु ज्ञानाद्यभावमात्रमित्यर्थः । ९ अनुभूतविषयासम्प्रमोषः प्रत्ययः स्मृतिः । पूर्वानुभवसंस्कारजं ज्ञानमित्यर्थः ॥ सर्व-वृत्तिजन्यत्वादन्ते कथनम् । लज्जादिवृत्तीनामपि पञ्चस्वेवान्तर्भावो द्रष्टव्यः ॥

१० अदत्तादानम् । ११ समाध्यनुष्ठानानुपयुक्तस्य वस्तुतोऽसंग्रहः । १२ ईश्वरप्राणिधानं तु भगवता पतञ्जलिमुनिना सूत्रद्वयेन प्रतिपादितम् । "तस्य वाचकः प्रणवः" । "तज्जप-स्तदर्थभावनम् " इति ।

Scanned by CamScanner

कः समाधिः॥श्रीमद्गौडपादैरपि निर्विकल्पसमाधिप्रतिबन्धकविघ्नपरिहारोपायः। "[1]उपायेन निगृह्णीयाद्विक्षिप्तं [2]कामभोगयोः। [3]सुप्रसन्नं लये चैव यथा[4]कामो लयस्तथा॥ १॥ [5]दुःखं सर्वमनुस्मृत्य कामभोगा[6]न्निवर्तयेत्। [7]अजं सर्वमनुस्मृत्य [8]जातं नैव [9]तु पश्यति॥२॥ लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः। सकषायं विजानीयात्समप्राप्तं न चालयेत्॥ ३॥ [10]नास्वादयेत्सुखं [11]तत्र निःसङ्गः प्रज्ञया भवेत्। निश्चलं निश्चरच्चित्तमेकीकुर्यात्[12]प्रयत्नतः[13]॥ ४॥ [14]यदा न लीयते चित्तं न च विक्षिप्यते पुनः। असङ्गिनमनाभासं निष्पन्नं ब्रह्म [15]तत्तदा"॥ ५॥ इति श्लोकपञ्चकेन दर्शितः। तस्माद्विनैवाष्टाङ्गैर्विघ्नप-

---

१ वक्ष्यमाणवैराग्याभ्यासेन। २ कामभोगयोर्विक्षिप्तं प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमयापि वृत्त्या परिणतं मनो निगृह्णीयादात्मन्येव निरुन्ध्यादित्यर्थः। कामभोगयोरिति चिन्त्यमानावस्थाभुज्यमानावस्थाभेदेन द्विवचनम्। ३ आयासरहितं। निगृह्णीयात्। ४ यथाकामो विषयगोचरप्रमाणादिवृत्त्युत्पादनेन समाधिविरोधी तथा लयोऽपि निद्राख्यवृत्त्युत्पादनेन समाधिविरोधी। ५ उपायमाह-दुःखमिति। ६ मनसैव। ७ द्वैतविस्मरणं तु परमोपाय इत्याह-अजमिति। ब्रह्म। ८ द्वैतजातम्। ९ अधिष्ठानज्ञाने कल्पितस्याभावात् पूर्वोपायापेक्षया वैलक्षण्यसूचनाय तुशब्दः। १० समाधौ। ११ प्रयत्नवशीकृतम्। १२ निरोधप्रयत्नेन। १३ केनचिद्विषयाकारेण न भासते। १४ चित्तम्। १५ प्रज्ञया सुखं नास्वादयेत् एतावन्तं कालमहं सुखीति सुखास्वादरूपां वृत्तिं न कुर्यात् समाधिभङ्गप्रसङ्गात्। प्रज्ञया यदुपलभ्यते सुखं तदविद्यापरिकल्पितं मृषैवेत्येवंभावनया निःसङ्गः सर्वसुखेषु भवेत्। अथवा प्रज्ञया सविकल्पसुखाकारवृत्तिरूपया सह सङ्गं परित्यजेत्। निश्चरत्स्वभावचाञ्चल्याद्विषयाभिमुखं बहिर्गच्छन् समे ब्रह्मण्येकतां नयेत्॥ ४॥ १६ समप्राप्तं चित्तं कीदृशमित्यत आह-यदेति। यदा न लीयते, नापि स्तब्धीभवति तामसत्वसाम्येन लयशब्दस्यैव स्तब्धीभावस्योपलक्षणात्। न च विक्षिप्यते। पुनः न शब्दाद्याकारवृत्तिमनुभवति नापि सुखमास्वादयति राजसत्वसाम्येन सुखास्वादस्यापि विक्षेपशब्देनोपलक्षणात्। पूर्वभेदनिर्देशस्तु पृथक्प्रयत्नकरणाय। इङ्गनं चलनं सवाततदीपवद्विषयाभिमुखरूपं तद्रहितं निवाततदीपकल्पम्॥ ५॥

Scanned by CamScanner

रिहारमन्तरेणापि च समाधिलाभो न भविष्यतीति चेत्सत्यं तत्र तत्र मन्द-विवेकिनं प्रति एतदुपायजालं प्रतिपादितम् । इह तु भगवता भाष्यकारेण तन्निरपेक्ष्येणैव महतां विवेकशालिनां सुखेन भावनामात्रवशात्समाधिलाभ उद्दिष्टः । एवंभूतत्रिपुटीलयात्मकाखण्डानन्दाविर्भावलक्षणनिर्विकल्पकसमाधि-रपि वृत्त्यभावेनानुद्भूवासनात्मकसुषुप्त्यवस्थावद्दुःखातिशयेनाभिभूतवासना-रूपमूर्च्छावस्थावच्च, पानातिशयेनेन्द्रियमनसां सम्प्रमोषलक्षणमदवद्वा न शङ्क-नीयः।तत्र तत्र स्वस्वरूपाज्ञानमात्रानुसन्धानस्यैव ततस्तत उत्थितानां परामर्शोप-पत्तेरुपलभ्यमानत्वादित्यभिप्रेत्य ब्रह्मात्मभावनायुक्तानां समाधिसमये प्रकाशा-नन्दानुभव एवावशिष्यते इत्याह—पूर्णात्मा इति । पूर्णात्मा " स एव पुरस्तात्स पश्चात्स दाक्षिणतः स उत्तरतः स एवेदं सर्वं वृक्ष इव स्तब्धो दिवि[1] तिष्ठत्येकस्तेनेदं पूर्णं[2] पुरुषेण सर्वम्" "सर्वं खल्विदं ब्रह्म" इत्यादि श्रुतिषु प्रसिद्धोऽखण्डनिरतिशयानन्दरूपः परमात्मा आशु तत्क्षणमेव सम्यक् स एवाहमित्यभेदेनाखण्डाकारबुद्धिवृत्त्या ईक्ष्यतां साक्षात्क्रियतामित्यर्थः । " यदि वापि समाधानैर्निर्विकल्पे स्थितिं व्रजेत् । तदक्षयसुषुप्त्याभं तन्मन्येतामलं पदम् ॥ १ ॥ न च पाषाणता तुल्या रूढिं याताः समाधयः । भवन्त्यग्रं पदं शान्तं चिद्रूपमजमव्ययम् ॥ २ ॥" इत्यादिवचनैः समाधिना ब्रह्मात्मलाभो न भविष्यतीति न विभावनीयम् । तत्र तत्र विवेकाभावेन केनचिन्निरोधाभ्यासेन सम्पादितनिर्विकल्पकसमाधिना साक्षात्काराभावो निरू-पितः । इह त्वौपनिषदानां परमहंसानां सत्यानृतविवेकवतां प्रत्यगभिन्नब्रह्म-भावनया समासादितनिर्विकल्पसमाधिना तत्क्षणमेव पूर्णात्मसाक्षात्कार इति भावः ॥ न च " केवलस्य प्रत्यगात्मनः स्वप्रकाशत्वाद् बुद्धिवृत्तिविषयत्वं न

---

१ स्वेमहिम्नि । २ पूरितम् ।

घटत" इति वाच्यम्। अज्ञाननिवृत्त्यर्थं वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात्॥ "मनसैवेदमाप्तव्यम्" "अप्रमेयमनाद्यं च" इत्यादिश्रुतिभ्यश्च। तदुक्तम्—

"स्वप्रकाशोऽपि साक्ष्येव धीवृत्त्या व्याप्यतेऽन्यवत्। फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम्॥१॥ बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम्। तत्राज्ञानं धिया नश्येताभासेन घटः स्फुरेत्॥२॥ ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता। स्वयं स्फुरणरूपत्वान्नाभास उपयुज्यते॥३॥ चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने यथा। न दीपदर्शने किन्तु चक्षुरेकमपेक्ष्यते॥४॥ स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत्परम्। न तु ब्रह्मण्यतिशयं फलं कुर्याद्घटादिवत्" इति॥५॥ सात्त्वखण्डाकाराकारिता बुद्धिवृत्तिः प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते। तदाखिलकारणेऽज्ञाने बाधिते सति, स्वयमेवापि बाधिता भवति इति सर्वथाऽविरोध इति॥

ननु पूर्णात्मलाभेऽपि व्युत्थानसमये कुद्दालकोटिभिर्दुर्भेद्यस्य दृश्यवृन्दस्य निवृत्तिः कथं स्यादित्याह—जगदिदमिति। इदं स्थूलसूक्ष्मात्मकं दर्शन

---

१ तर्ह्यपसिद्धान्त इत्याशङ्क्य पूर्वाचार्यैरपि वृत्तिव्याप्यत्वस्याङ्गीकृतत्वान्नायमपसिद्धान्त इति परिहरति। फलेति। फलं वृत्तिप्रतिबिम्बितश्चिदाभासस्तद्व्याप्यत्वम्। २ प्रत्यग्ब्रह्मणः। ३ स्वस्यैव स्फुरणरूपत्वात्। ४ आत्मनि फलव्याप्यत्वाभावं दर्शयितुमनात्मनो वृत्त्या फलेन च व्याप्यत्वं दर्शयति। बुद्धीति। ५ उभयोः प्राप्तेः प्रयोजनमाह। तत्रेति। ६ प्रमाणभूतया नश्येत ज्ञानाज्ञानयोर्विरोधात्। ७ जडत्वेन स्वतः स्फुरणायोगात्। ८ इदानीं ब्रह्मणि ततो वैलक्षण्यं दर्शयति। ब्रह्मणीति। ९ प्रत्यग्ब्रह्मणोरेकत्वस्याज्ञानेनावृतित्वात्। १० घटादिव्यवहारेषु युज्यमानोऽपि चिदाभासोऽत्र नोपयुज्यते। ११ उक्तमर्थं दृष्टान्तप्रदर्शनेन विशदयति। चक्षुरिति। १२ तमआवृतस्य। १३ ननु बुद्धिवृत्तीनां चिदाभासवैशिष्ट्यस्वाभाव्याद्घटादिष्विव ब्रह्मण्यपि फलव्याप्तिर्बलाद्भवेदित्याशङ्क्याह। स्थित इति। यद्यपि घटाकाराद्याकारवृत्तिवद्ब्रह्मगोचरवृत्तावपि चिदाभासोऽस्तीति तथापि नासावाभासः ब्रह्मणो भेदेन भासते, किन्तु प्रचण्डातपमध्यवर्तिप्रदीपप्रभावत्तेनैकीभूत इव भवतीति॥

स्मरणविषयमध्यासभूतं "गच्छति बाधाम्" इति जगत्तेनाधिष्ठानदर्शनेन दण्डमालादिदर्शनेन सर्पत्वमिव बाधितं संमार्जितं दृश्यतामित्यर्थः ॥ एवं-भूतस्य ब्रह्मसाक्षात्कारवतः । "तदधिगमे उत्तरपूर्वाघयोरश्लेषविनाशौ" इति श्रीभगवद्व्यासोक्तसूत्रदर्शितन्यायेन लक्षणमुपदेशभङ्ग्या विवृणोति । प्राक्कर्मेति । अनेकभवपरम्परामारभ्य साक्षात्कारपर्यन्तं सत्वादिगुणभेदेन शुभाशुभात्मकं नानात्वेन कृतं स्वाज्ञानक्षेत्रे सस्यराशिरिव प्राक्संचितं कर्म स्वप्रकाशपरमानन्दरूपा या चितिस्तस्या बलात्तदात्मकत्वनिश्चयलक्षणात्प्रविलाप्यतां प्रकर्षेण सर्वकर्माश्रयभूताज्ञाननाशपूर्वकं यथा भवति तथा विलाप्यतां विनाश्यतामित्यर्थः ॥ चितिबलादित्यस्य पदस्य देहलीदीपन्यायेनोत्तरत्रापि योजना ॥ उत्तरे ब्रह्मसाक्षात्कारानन्तरं क्रियमाणे कर्मणि तेन चितिबलेन वर्णितेन न च श्लिष्यतामहं कर्तेदं मया कार्यमित्यादि अविवेकजन्यनिश्चयपरिहारेणाश्लेषः क्रियतामित्यर्थः । "क्षीयन्ते चाऽस्य कर्माणि तस्मिन्दृष्टे परावरे" इति श्रुतेः ॥ तथा च स्मृतिः । "यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥" इति ।

ननु देहात्मबुद्धिवत्परात्मत्वनिश्चयदार्ढ्येन महतां ब्रह्मसाक्षात्कारवतां भवतु कर्मद्वयपरिहारोऽपि, प्रारब्धकर्मणोऽतिप्रबलत्वान्न केनाप्युपायेन तन्नाशं प्रत्याशा "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति श्रुतेः ॥ तदसंक्षये संसारो दुर्वार इत्याशङ्क्य, प्रारब्धकर्मणामसक्ततया भोगमात्रेणैव ब्रह्मविदामनायासेन निवृत्तिर्भवतीत्याह—प्रारब्धमिति । तुशब्दः पक्षान्तरे इहास्मिन्संसारे विदुषां क्रीडास्थाने प्रागारब्धं कर्म स्वेच्छादिभेदेन त्रिविधं भिक्षाटनादि स्वेच्छाकृतम्, शिष्यादिभिर्दीयमानमन्नादिकं परेच्छाकृतम् आकाशफलपातवदकस्मात्पाषाणपतनकण्टकवेदनादिकमनिच्छाकृतं

१ ब्रह्मसाक्षात्कारे । २ ब्रह्मसाक्षात्कारवतः ।

देहयात्रामात्रार्थं बाधितानुवृत्त्या भुज्यतामित्यर्थः । न च दृश्यासम्भवबोधयुक्तस्य तत्त्वविदः सर्वथेच्छाभावएवोपयुज्यत इति वाच्यम् । दृश्यासम्भवबोधेन नास्तीच्छाभावः, किन्तु विद्वदिच्छाया इष्यमाणपदार्थस्यासत्त्वज्ञानेन बाधितत्वाद्वासनादिकार्याक्षमत्वाच्च, भर्जितबीजवदाभासरूपा सती आरब्धफलभोगायैव सोपयुज्यते ॥ तदुक्तम् "नेच्छानिषेधः किन्त्विच्छाबाधो भर्जितबीजवत् । भर्जितानि तु बीजानि सन्त्यकार्यकराणि च ॥१॥ विद्वदिच्छा तथेष्टव्यासत्त्वबोधान्न कार्यकृत् । दग्धबीजमनारोपिभक्षणायोपयुज्यते ॥ २ ॥ विद्वदिच्छाप्यल्पभोगं कुर्यान्न व्यसनं बहु" इति ॥

एवंभूतस्य संसारबन्धनिर्मुक्तस्य साक्षात्कृतस्वप्रकाशसर्वावभासकस्वात्मदेवस्यावस्थाभेदेन ब्रह्मविद्ब्रह्मविद्वर-ब्रह्मविद्वरीयान्-ब्रह्मविद्वरिष्ठ इति संज्ञाचतुष्टयभेदो वेदान्तेषु प्रसिद्धः ॥ तथाहि । यस्य श्रवणमननिदिध्यासनसमाध्यभ्यासेन निर्विकल्पब्रह्मात्मसाक्षात्कारलाभस्ततस्वभावात्समग्रदृश्यवृन्दं प्रतीन्द्रजालवत् स्वप्ननगरादिवद्वा भवत्यपि सत्त्वप्रतीतिः । तथापि प्राग्वासनाप्राबल्याद्ब्रह्मैकगोचरसमाधिपूर्वकालीनात्प्रयत्नादपि चानिच्छतोऽपि सहसैव निर्विकल्पसमाधिभङ्गस्तस्य ब्रह्मविदित्यभिधानम् । सोऽयं भगवता वसिष्ठेन निर्विकल्पसन्मात्रसाक्षात्कारात्मक "सत्त्वापत्ति" नामकचतुर्थभूमिकाकथनेन कथितः । सा तु सर्वस्य जगतो मिथ्यात्वेन स्फुरणात्स्वप्नावस्था ॥ तदुक्तम् । "अद्वैते स्थैर्यमायाते चित्ते च प्रशमं गते । पश्यन्ति स्वप्नवल्लोकं चतुर्थी भूमिकामिता" इति अतः परं तिस्रोऽवस्था जीवन्मुक्तेरेवावान्तरभेदास्तेनैव

---

१ नाङ्कुरादिकार्यकराणि । २ ननु विदुष इच्छैवनाङ्गीकर्तव्या फलाभावादित्याशंक्य, फलाभावोऽसिद्धो, भोगलक्षणसद्भावादिति सदृष्टान्तमाह-दग्धबीजमिति । भर्जितबीजम् ३ अङ्कुराऽजनकम् । ४ प्राक्कालोद्भूतात् । ५ निर्विकल्पसमाधिद्वारा । ६ असत्त्वप्रतीत्या । ७ तेनापीत्यपिपाठः । वसिष्ठेनापि ।

Scanned by CamScanner

भगवता भूमिकाभेदोनोक्ताः । तथाहि । " चतुर्थी भूमिका ज्ञानं तिस्रः स्युः साधनं पुरा । जीवन्मुक्तेरवस्थास्तु परास्तिस्रः प्रकीर्तिताः " इति यस्तु निरायासेन निर्विकल्पसमाधिमनुभवंस्ततो व्युत्थानं च सुषुप्तेः स्वप्न इव स्वत एव प्राप्नोति, व्युत्थानसमयेऽन्तःकरणज्ञानकर्मेन्द्रियशरीरैः स्वात्मन्यध्यस्तैः स्फटिकमणौ विविधकुसुमादियोगेन विचित्रवर्णतावन्मिथ्यात्वेन प्रतीयमानैः पूर्ववासनानुवृत्त्या यथेष्टावरणवर्जनपुरःसरं सदाचारक्रमेण क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति, यथा दर्पणान्तर्गतं गिरिग्रामादिकमिति ज्ञानवांस्तदिदं गिरिग्रामादिकं पश्यन्नपि परमार्थमिदमिति न पश्यति ॥ "सचक्षुरचक्षुरिव, सकर्णोऽकर्ण इव" इत्यादिश्रुतेः ॥ उक्तं च । " यथास्थितमिदं यस्य व्यवहारवतोऽपि च । अस्तं गतं स्थितं व्योम स जीवन्मुक्त उच्यते " इति । स ब्रह्मविद्वर इत्युच्यते । सोऽयं भगवता वसिष्ठेन "दशासंसक्ति" नामकपञ्चमभूमिकाप्रदर्शनेन दर्शितः । यदैवंविधसाक्षात्कारयुक्तस्य निरतिशयानन्दाद्वितीयस्वात्मानुसन्धानप्रागल्भ्येन निर्विकल्पसमाधिश्चिरकालस्थायी भवति ततो व्युत्थानं तु परप्रयत्नेनैव स्यात्तदा तं ब्रह्मविद्वरीयानिति व्यपदिशन्ति तत्त्वविदः ॥ सोऽयं भगवता वसिष्ठेन "पदार्थाभावनात्मक"षष्ठीभूमिकानिरूपणेन निरूपितः ॥ पुनस्तेन पञ्चमी भूमिका सुषुप्तिः कथिता । समाधेः स्वत एव व्युत्थानात् । षष्ठी तु गाढसुषुप्तिः परप्रयत्नमन्तरेणानुत्थानात् । " पञ्चमीं भूमिकामेत्य सुषुप्तिपदनामिकाम् । षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति भूमिकाम्" इति ॥ यर्हि निर्विकल्पसमाधेर्न स्वतो न वा परतो व्युत्थितो भवति, किन्तु सदा तन्मय एव स्यात्, स्वप्रयत्नमन्तरेणैव परमेश्वरप्रेरितप्राणवायुवशादन्यैर्निर्वा-

१ शुभेच्छादि ।

ह्रियमाणदैहिकव्यवहारः परिपूर्णपरमानन्दघन एव सर्वथा तिष्ठति तर्हि "ब्रह्मविद्वरिष्ठ" इति नाम्ना परिगीयमानस्तज्ज्ञैः ॥ सोऽयं भगवता वसिष्ठेन भेदाभानेनाखण्डभूमानन्दात्मकस्वस्वरूपैकनिष्ठालक्षण-तुर्यावस्था सप्तमी-भूमिकाप्रपञ्चनेन प्रपञ्चितः इति । जीवन्मुक्तिमुपवर्ण्येदानीं विदेहमुक्तिं वर्णयति । अथ पारब्रह्मात्मना स्थीयतामिति । अथ प्रारब्धकर्मावसाने प्रत्यगानन्दरूपे परब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्यसंस्काराणामपि नाशात्परं सर्वोत्तीर्णं परमकैवल्यमानन्दैकरसमखिलभेदबुद्धिप्रतिभासरहितं यदखण्डं ब्रह्म तदात्मना स्थीयतामित्यर्थः । तथा च श्रुतिः । "न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयते विमुक्तश्च विमुच्यते" इति ॥ चतुर्थी भूमिका तु तत्त्वसाक्षात्कार एव । पञ्चमषष्ठसप्तमभूमयस्तु जीवन्मुक्तेरेवावान्तरभेदा इति व्याख्यायते॥

तत्र चतुर्थीं भूमिं प्राप्तस्य तत्त्वविदो मृतस्य जीवन्मुक्त्यभावेऽपि विदेहकैवल्यं प्रति नास्त्येव संशयः । उक्तं हि । "गोदोहमिषुपातं वा नयनोन्मीलनं च वा । सकृज्जाते परे तत्त्वे स मुक्तो मोचयेत्परान् इति ॥ तदुत्तरभूमिकात्रयं प्राप्तो ब्रह्मविद्वरो,ब्रह्मविद्वरीयान्,ब्रह्मविद्वरिष्ठ इति संज्ञाभेदैर्व्यवह्रियमाणो जीवन्नपि मुक्तः किमु विदेह इति । नास्त्येव भूमिकाचतुष्टयप्राप्तान्प्रति विदेहकैवल्यशङ्का ॥ ये तु ब्रह्मसाक्षात्कारसाधनभूतासु तिसृषु भूमिषु देहमुत्सृजन्तः, तेषामेव प्राणोत्क्रान्तिसमये विदेहकैवल्याभावो भवति । पुनर्मानुष्ये चरमशरीरे जीवन्मुक्तिलाभेन विदेहकैवल्यभाजो भवन्तीति भगवद्वसिष्ठरामसंवादेनावगम्यते । श्रीरामः । "एकामथ द्वितीयां वा तृतीयां भूमिकामुत । आरूढस्य मृतस्यापि कीदृशी भगवन्गतिः" ॥ नित्यानित्यवस्तुविवेकपूर्वकादिहामुत्रार्थभोगवैराग्याच्छमदमश्रद्धातितिक्षासर्वकर्मसंन्यासादिपुरःसरा मुमुक्षा "शुभेच्छाख्या" प्रथमभूमिका ॥ साधनचतुष्टयसम्पदिति यावत् ॥ १ ॥ ततो गुरुमुपसृत्य वेदान्तवाक्यविचारणात्मिका द्वितीया भूमिका श्रवणमननसम्प-

इति यावत् ॥ २ ॥ ततो मनसः सूक्ष्मवस्तुग्रहणयोग्यतारूपा " तनुमानसाख्या" तृतीया भूमिका । निदिध्यासनसम्पदिति ॥ ३ ॥ एवंविधासु साधनरूपासु तिसृषु भूमिष्वारूढं मृतं प्रति श्रीरामस्य भवशङ्का । श्रीवसिष्ठः ।"योगभूमिकयोत्क्रान्तजीवितस्य शरीरिणः । भूमिकांशानुसारेण क्षीयते पूर्वदुष्कृतम् ॥ १ ॥ ततः सुरविमानेषु लोकपालपुरेषु च । मेरूपवनकुञ्जेषु रमते रमणीसखः ॥ २ ॥ ततः सुकृतसम्भारे दुष्कृते च पुरा कृते । भोगक्षयात्परिक्षीणे[1] जायन्ते योगिनो भुवि ॥ ३ ॥ शुचीनां श्रीमतां गेहे गुप्ते गुणवतां सताम् । जनित्वा योगमेवैते सेवन्ते योगवासिताः ॥ ४ ॥ तत्र प्राग्भावनाभ्यस्तं योगभूमित्रयं बुधाः । दृष्ट्वा परिपतन्त्युच्चैरुत्तरं भूमिकात्रयम् " ॥ ५ ॥ इति ॥ तत्र प्राग्वासनाप्राबल्यादल्पकालाभ्यस्तवैराग्यवासनादौर्बल्येन प्राणोत्क्रान्तिसमये प्रादुर्भूतभोगस्पृहः सर्वकर्मसन्न्यासी यः तस्य शुचीनां श्रीमतां गेहे जन्मग्रहणोक्तिः । यस्तु वैराग्यवासनाप्राबल्यात्प्रकृष्टपुण्यप्रकटितपरमेश्वरप्रसादवशेन प्राणोत्क्रान्तिसमयेऽनुद्भूतभोगस्पृहः सन्न्यासी तस्य भोगव्यवधानं विनैव सतां ब्रह्मविदां ब्राह्मणानामेव गुप्ते सर्वप्रमादकारणशून्ये गृहे जन्मग्रहणोक्तिः ॥ तस्यैव श्रीभगवत्कृष्णार्जुनसंवादेऽपि । श्रीअर्जुन उवाच । "अयतिः[2] श्रद्धयोपेतो योगाच्चलितमानसः । अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ १ ॥ कच्चिन्नोभय[3]विभ्रष्टश्छिन्नाभ्रमिव नश्यति । अ[4]प्र-

---

१ प्राचीनपुण्योपचयात्परिक्षीणे । २ अयतिरल्पयत्नः " अल्पार्थे नञ् "। "अलवणा यवागूः " इत्यादिवत् । गुरुवेदान्तवाक्येषु विश्वासलक्षणा श्रद्धा । सा च स्वसहचरितानां शमदमादीनामुपलक्षणम् । तेनासौ साधनचतुष्टयसम्पन्नो गुरुमुपसृत्य वेदान्तवाक्यश्रवणादि कुर्वन्नपि परमायुषोऽल्पत्वेन मरणकाले चेन्द्रियाणां व्याकुलत्वेन साधनानुष्ठानासम्भवात् , योगाच्छ्रवणादिपरिपाकलब्धतत्त्वसाक्षात्काराच्चलितं तत्फलमप्राप्तं मानसं यस्य सः, कां गतिं स्वर्गतिं दुर्गतिं वा । कर्मणां परित्यागाज्ज्ञानस्यानुत्पत्तेः । ३ कर्मज्ञानमार्गाभ्यां विभ्रष्टः ॥ ४ देवयानपितृयानमार्गगमनहेतुभ्यामुपासनाकर्मभ्यां साधनाभ्यां रहितः ।

Scanned by CamScanner

तिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ २ ॥ एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः । त्वदन्यः संशयस्यास्य च्छेत्ता नह्युपपद्यते ॥ ३ ॥ श्रीभगवानुवाच । पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते । नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४ ॥ प्राप्य पुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे[१४] योगभ्रष्टोऽभिजायते ॥ ५ ॥ अथवा योगिनामेव कुले भवति धीमताम् । एतद्धि[१८] दुर्लभतरं लोके जन्म यदीदृशम् ॥ ६ ॥ तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम्[२२] । यतते च ततो[२४] भूयः संसिद्धौ कुरुनन्दन " ॥ ७ ॥ इति ॥ एतेन साधनपराणामेव पुनरावृत्तिः, नतु सिद्धानां ब्रह्मसाक्षात्कारवताम् । "न स पुनरावर्तते न स पुनरावर्तते" इति श्रुतेः ।

इति श्रीमच्छ्रीभगवत्पूज्यपाद–शङ्कराचार्यविरचितमुपदेशरत्नपञ्चकं सम्पूर्णम् ॥

इति श्रीमच्छ्री–आदिकारणापरनामक–पण्डितकाकनिधानेनोपदेशरत्नपञ्चकस्य रत्नप्रभाव्याख्या कृता सम्पूर्णा ॥ श्रीकृष्णार्पणमस्तु ॥

---

४ अनुत्पन्नब्रह्मात्मसाक्षात्कारः । ५ ब्रह्मप्राप्तिमार्गे ज्ञाते । ६ यस्मात् । ७ शास्त्रविहितकारी । ८ इहाकीर्तिं परत्र कीटादिरूपताम् । ९ तदेवं योगभ्रष्टस्य शुभकृत्त्वेन लोकद्वयेऽपि नाशाभावे । किं भवतीत्यपेक्षायां भोगस्पृहाऽस्पृहाभ्यां द्वैविध्यं कल्पयित्वा प्रथमं प्रतिपक्षमाह । प्राप्येति । १० अश्वमेधादियाजिनामर्चिरादिमार्गेण । ११ वासमनुभूय । १२ तदन्ते श्रद्धानाम् । १३ विभूतिमताम् । १४ कुले । १५ जनकादिवत् । १६ द्वितीयं प्रति पक्षान्तरमाह । अथवेति । १७ ब्रह्मविद्यावतां दरिद्राणां ब्राह्मणानाम् । १८ हि प्रसिद्धं शुकादिवत् । १९ पूर्वस्मात् श्रीमद्गृहेजन्मप्राप्तिलक्षणाद्दुर्लभादपिदुर्लभं सर्वकर्मसन्न्यासार्हत्वात् । २० एतादृशस्य जन्मद्वयस्य दुर्लभत्वं कस्माद्यस्मात्तत्रेति । द्विप्रकारे जन्मनि । २१ ब्रह्मात्मैक्यविषयया बुद्ध्या संयोगं श्रवणादिसाधनकलापं यावत्पर्यन्तमनुष्ठितं लभते प्राप्नोति । २२ पूर्वदेहोद्भवम् । २३ नतु केवलं लभत एव किन्तु यतते प्रयत्नं कुरुते । २४ साधनकलापानन्तरम् । २५ अधिकम् ।

Scanned by CamScanner